श्री कुमार स्तुतिः (देव कृतं)

श्री कुमार स्तुतिः (देव कृतं)

देवा ऊचुः |
नमः कळ्याणरूपाय नमस्ते विश्वमंगळ |
विश्वबंधो नमस्तेऽस्तु नमस्ते विश्वभावन || 2 ||

नमोऽस्तु ते दानववर्यहंत्रे
बाणासुरप्राणहराय देव |
प्रलंबनाशाय पवित्ररूपिणे
नमो नमः शंकरतात तुभ्यं || 3 ||

त्वमेव कर्ता जगतां च भर्ता
त्वमेव हर्ता शुचिज प्रसीद |
प्रपंचभूतस्तव लोकबिंबः
प्रसीद शंभ्वात्मज दीनबंधो || 4 ||

देवरक्षाकर स्वामिन् रक्ष नः सर्वदा प्रभो |
देवप्राणावनकर प्रसीद करुणाकर || 5 ||

हत्वा ते तारकं दैत्यं परिवारयुतं विभो |
मोचिताः सकला देवा विपद्भ्यः परमेश्वर || 6 ||

इति श्रीशिवमहापुराणे रुद्रसंहितायां कुमारखंडे द्वादशोऽध्याये तारकवधानंतरं देवैः कृत कुमार स्तुतिः |